अथ स्नानम्। दक्षः।
"अस्नात्वा नाचरेत् कर्म्म जपहोमादि किञ्चन।
लालास्वेदसमाकीर्णः शयनादुत्थितः पुमान्॥
अत्यन्तमलिनः कायो नवच्छिद्रसमन्वितः।
स्रवत्येव दिवारात्रौ प्रातःस्नानं विशोधनम्॥
प्रातःस्नानं प्रशंसन्ति दृष्टादृष्टफलं हि तत्।
सर्व्वमर्हति पूतात्मा प्रातःस्नायी जपादिकम्॥
अज्ञानात् यदि वा मोहात् रात्रौ दुश्चरितं
कृतम्।
प्रातःस्नानेन तत् सर्व्वं शोधयन्ति द्विजातयः॥"
दृष्टं मलापकर्षादि अदृष्टं प्रत्यवायपरीहारादि॥ प्रातः सूर्य्योदयात् प्राक्कालः। प्रातःस्नायिअरुण-किरणग्रस्तां प्राचीमवलोक्य स्नायात्। इति विष्णूक्तेः॥ * ॥ प्रातःस्नाने मध्याह्नस्नान-धर्म्मातिदेशमाह कात्यायनः।
"यथाहनि तथा प्रातर्नित्यं स्नायादनातुरः।
दन्तान् प्रक्षाल्य नद्यादौ गेहे चेत्तदमन्त्रवत्॥"
यथा तथेतिकर्त्तव्यतया। सा च।
"आचरेदुषसि स्नानं तर्पयेत् देवमानुषान्।"
इति जावाल्युक्तेः॥
वैदिके कर्म्मणि वामहस्ते बहुतरकुशान् दक्षिणेन पवित्रं धारयेत्। मार्कण्डेयः।
"सर्व्वकालं तिलैः स्नानं पुण्यं व्यासोऽब्रवीन्मुनिः
श्रीकामः सर्व्वदा स्नानं कुर्व्वीतामलकैर्नरः।
सप्तमीं नवमीञ्चैव पर्व्वकालञ्च वर्ज्जयेत्॥"*॥
विष्णुधर्म्मोत्तरे।
"त्वराक्रोधौ तथा वर्ज्जौ देवकर्म्मणि पण्डितैः।
इक्षुरापः पयश्चैव ताम्बूलं फलमौषधम्।
भक्षयित्वा तु कर्त्तव्याः स्नानदानादिकाः
क्रियाः॥"
भविष्योत्तरे।
"स्नातुस्तु वरुणस्तेजो जुह्वतोऽग्निः श्रियं हरेत्
भुञ्जानस्य यमस्त्वायुस्तस्मान्न व्याहरेत्त्रिषु॥"
स्नातुः स्नानं कुर्व्वतः। न व्याहरेत् न कथयेत्॥
अशुचेरवगाहनानन्तरं स्नानमाह योगियाज्ञवल्क्यः।
"तूष्णीमेवावगाहेत यदा स्यादशुचिर्नरः।
आचम्य तु ततः पश्चात् स्नानं विधिवदाचरेत्॥"
वामनपुराणम्।
"नाभिमात्रजले स्थित्वा कृत्वा केशान् द्विधा
द्विजः।
निरुध्य कर्णौ नासाञ्च त्रिःकृत्वो मज्जनं ततः॥"
तत्रैव वृद्धयाज्ञवल्क्यः।
"स्रोतसां संमुखो मज्जेत् यत्रापः प्रवहन्ति वै।
स्थावरेषु गृहे चैव सूर्य्यसंमुख आप्लवेत्॥"
हारीतः। नातुरो न भुक्त्वा न जीर्णवासा न बहुवासा न नग्नो नाश्नन् नावसक्थिको नालङ्कृतो नाजस्रं नाज्ञाते जले नाकुले नाशुचौ न प्रभूतजले न नाभेरल्पजले न चत्वरे नोपद्वारे नो सन्ध्यायां न निशायां स्नायादिति। चत्वरे काकादिबलिस्थले इति श्रीदत्तः॥ उपद्वारे द्वार-समीपे। अत्रैकेन मुनिना नग्नबहुवाससोर्निषेध-विधानात् स्नाने द्विवाससः एवाधिकारः प्रतीयते॥ * ॥ एकवस्त्रस्नाने दोषमाह समुद्रकरकृतभाष्ये गोतमः।
"एकवस्त्रेण यत् स्नानं सूच्या विद्धेन चैव हि।
स्नातस्तु न भवेत् शुद्धः श्रिया च परिहीयते॥"
अतएव।
"स्नानं तर्पणपर्य्यन्तं कुर्य्यादेकेन वाससा।"
इति॥
यदि समूलं तदा प्रेततर्पणपरमिति। अत्रैकवस्त्रा स्नातय इत्यादिना एकवस्त्रत्वविधानात्। एकेन एकजातीयेन इति वाचस्पतिमिश्रः॥ येन वाससा स्नानं कृतं जलस्थस्य तेनैव तर्पणम्। इति कृत्यतत्त्वार्णवः॥ न च।
"स्नानशाट्यान्तु दातव्या मृदस्तिस्रो विशुद्धये।
जलमध्ये तु यः कश्चित् द्विजातिर्ज्ञानदुर्बलः।
निष्पीड़यति तद्वस्त्रं स्नानं तस्य वृथा भवेत्॥"
स्नानशाट्यामिति तद्वस्त्रमिति एकवचननिर्देशेन च स्नानेऽप्येकवस्त्रत्वमिति वाच्यं अत्र विशुद्धये इत्यभिधानेनाधोधृतवस्त्रस्यैव मृत्तयेण प्रक्षालनं न तूत्तरीयस्य एतदर्थमेकवचनम्। अत एव मृत्तयेणाधरीयवस्त्रं प्रक्षाल्य इत्याह्निकचिन्तामणिः॥ वशिष्ठवचनस्यैकवाक्यतया स्नातो नाङ्गानि निर्मृज्यात् स्नानशाट्या न पाणिना। इति विष्णुपुराणीयेनाधरीयवस्त्रेणैव गात्रमार्जनं निषिध्यते। एतेन निष्पीड्य स्नानवस्त्रमिति कात्यायनवचने एकत्वमविवक्षितमिति निरस्तम्। अतएव सर्व्वत्रैकत्वनिर्देशः। शिष्टानामाचारोऽपि तथेति॥ * ॥ नाजस्रमिति पुनः पुनः स्नाननिषेधः रागप्राप्तस्नानविषयो दृष्टार्थकत्वात्। एवञ्चैकस्मिन् दिने नानातीर्थादिनिमित्तप्राप्तस्नानावृत्तिर्भवत्येव वैधत्वात्। अत्रापि तन्त्रप्रसङ्गयोः सत्त्वे सकृदेवेति॥ * ॥ आतुरं प्रति जावालः।
"अशिरस्कं भवेत् स्नानं स्नानाशक्तौ तु
कर्म्मिणाम्।
आर्द्रेण वाससा वापि दैहिकं मार्ज्जनं स्मृतम्॥"
कर्म्मिणाम्।
"शिरःस्नातस्तु कुर्व्वीत दैवं पैत्रमथापि वा।"
इति मार्कण्डेयपुराणोक्तकर्म्मचिकीर्षूणां मार्ज्जनमिह प्रोक्षणम्। योगियाज्ञवल्क्यः।
"असामर्थ्याच्छरीरस्य कालशक्त्याद्यपेक्षया।
मन्त्रस्नानादितः सप्त केचिदिच्छन्ति सूरयः॥
मान्त्रं भौमं तथाग्नेयं वायव्यं दिव्यमेव च।
वारुणं मानसञ्चैव सप्तस्नानं प्रकीर्त्तितम्॥
आपोहिष्ठेति वै मान्त्रं मृदालम्भस्तु पार्थिवम्
आग्नेयं भस्मना स्नानं वायव्यं गोरजः स्मृतम्॥
यत्तु सातपवर्षेण स्नानं तद्दिव्यमुच्यते।
वारुणञ्चावगाहस्तु मानसं विष्णुचिन्तनम्॥
समस्तं स्नानमुद्दिष्टं मन्त्रस्नानक्रमेण तु।
कालदोषादसामर्थ्यात् सर्व्वं तस्य फलं स्मृतम्॥"
आपोहिष्ठेति आपोहिष्ठादि ऋक्त्रयमत्र विवक्षितम्। एवञ्च।
कालदोषादसामर्थ्यात् न शक्नोति यदाप्लुसि।
तदा स्नात्वा तु ऋषिभिर्मन्त्रैर्जुष्टन्तु मार्ज्जनम्॥
शन्न आपस्तु द्रुपदा आपोहिष्ठाघमर्षणम्।
एभिश्चतुर्भिः कृतं स्नातैर्मन्त्रस्नानमुदाहृतम्॥"
इति योगियाज्ञवल्क्यीयं यन्मन्त्रस्नानान्तरं तत् प्राधान्यख्यापनाय अतएव पितृदयितायां सन्ध्यातः पूर्व्वं तल्लिखितम्। मृदालम्भस्तु गङ्गादिमृत्तिकातिलकरूपः। भस्मना संस्कृतभस्मना इति छन्दोगाह्निकः। अवगाह्य मन्त्राद्यङ्गशून्यावगाहनमात्रं विवक्षितं अतो मुख्यावगाहनरूपस्नानानुकल्पत्वमप्युक्तम्। कालदोषोऽतिवृष्ट्यादिः। असामर्थ्यं शरीरापाटवहेतुः। जलस्य स्वल्पत्वेन सम्पूर्णवारुणस्नानविधिकालायोग्यत्वं वेति। एतन्मूलकं गेहे चेत्तदमन्त्रवदिति छन्दोगपरिशिष्टीयं पूर्व्वोक्तं अन्यथा मूलभूतश्रुत्यन्तरकल्पनापत्तेः॥ सामर्थ्ये तूद्धृतजलेनापि समन्त्रकस्नानमाह पराशरभाष्ये व्यासः।
"शीतास्वपो निषेव्योष्णा मन्त्रसम्भारसंस्कृताः
गेहेऽपि शस्यते स्नानं तद्धीनमफलं स्मृतम्॥"
पद्मपुराणम्।
"नैर्मल्यं भावशुद्धिश्च विना स्नानं न जायते।
तस्मान्मनोविशुद्ध्यर्थं स्नानमादौ विधीयते।
अनुद्धृतैरुद्धृतैर्व्वा जलैः स्नानं सदाचरेत्।
तीर्थं प्रकल्पयेद्विद्वान् मूलमन्त्रेण मन्त्रवित्॥
नमो नारायणायेति मूलमन्त्र उदाहृतः।
दर्भपाणिस्तु विधिना आचान्तः प्रयतः शुचिः॥
चतुर्हस्तसमायुक्तं चतुरस्रं समन्ततः।
प्रकल्प्यावाहयेद्गङ्गां एभिर्मन्त्रैर्विचक्षणः॥
विष्णोः पादप्रसूतासि वैष्णवी विष्णुपूजिता।
पाहि नस्त्वेनसस्तस्मादाजन्ममरणान्तिकात्॥
तिस्रः कोट्योऽर्द्धकोटी च तीर्थानां वायुरब्रवीत्
दिवि भुव्यन्तरीक्षे च तानि ते सन्ति जाह्नवि॥
नन्दिनीत्येव ते नाम देवेषु नलिनीति च।
वृन्दा पृथ्वी च सुभगा विश्वकाया शिवा सिता॥
विद्याधरी सुप्रसन्ना तथा लोकप्रसादिनी।
क्षमा च जाह्नवी चैव शान्ता शान्तिप्रदायिनी॥
एतानि पुण्यनामानि स्नानकाले प्रकीर्त्तयेत्।
भवेत् सन्निहिता तत्र गङ्गा त्रिपथगामिनी॥
सप्तवाराभिजप्तेन करसंपुटयोजितम्।
मूर्द्ध्नि दद्यात् जलं भूयस्त्रिश्चतुः पञ्च सप्त वा।
स्नानं कुर्य्यान्मृदा तद्वत् आमन्त्र्य विचक्षणः॥
अश्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसुन्धरे।
मृत्तिके हर मे पापं यन्मया दुष्कृतं कृतम्॥
उद्धृतासि वराहेण कृष्णेन शतबाहुना॥
आरुह्य मम गात्राणि सर्व्वं पापं प्रमोचय।
नमस्ते सर्व्वभूतानां प्रभवारिणि सुव्रते॥"*॥
नमो नारायणाय इत्यष्टाक्षररूपमूलमन्त्रेण चतुरस्रं चतुष्कोणरूपं समन्ततः सर्व्वदिक्षु चतुर्हस्तं जलं प्रतिदिक्षु हस्तमात्रेण व्यवच्छिद्य तीर्थं प्रकल्पयेत्। वितते नद्यादिजले स्नानस्थानं परिच्छिन्द्यात्। तत्र विष्णोः पाद इत्यादिना